Vande Bharata Mataram 2

# वन्दे भारतमातरम् २

## Document Information

Text title : Vande Bharata Mataram 2

File name : vandebhAratamAtaram2.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# वन्दे भारतमातरम् २

(गीतिका) (मात्रासमक जाति)
वन्दे भारत-मातरमेता
सुषमा गौरव-गुम्फित-वेषाम् ।
हिमगिरि-शुभ्र-किरीट-सुशोभा
विन्ध्य-राजि-कटि-रत्न-सुमध्याम् ॥ वन्दे० ॥

शस्य-श्यामला गुण-गण हृद्या
कुसुम-समृद्धि-फलैरभिनन्द्याम् ।
क्रान्तिकारिबलिदान-मनोज्ञा
शान्तिदूत-जन-त्याग-बलाढयाम् ॥ वन्दे० ॥

शौर्य-धैर्य-चल-सञ्चित शक्तिः
त्याग-तपोबल-संश्रित-शान्तिम् ।
करुणा-मुदिताऽमृतमय-चित्ता
दीन-हीन-जनताऽर्पित-वित्ताम् ॥ वन्दे० ॥

षष्टि-कोटि-जन-घोष-कराला
शान्ति-सरोवर-रुचिर-मरालाम् ।
धान्य-समृद्धि समेधित-शोभा
सरिता कल-रव-राजित-देहाम् ॥ वन्दे० ॥

तुहिनदीधितेर्दीधिति-रम्या
तिग्मदीधितेर्दीधिति-दीप्ताम् ।
हास-लास्य-लय-गीति-गुणाढ्या
स्नेह-दया-शुचिता-रुचिराभाम् ॥ वन्दे० ॥

शत्रु-मर्दिनी सल-दल-दलनी ।
दुःख-हारिणी शोक-तारिणीम् ।
ताप-शाप-भय-त्रास-वारिणी

दैन्य-दोष-मद-रोष-हारिणीम् ॥ वन्दे० ॥

सुखदा वरदा सुरुचि-हासिनी
मञ्जुल-वाच स्नेह-धारिणीम् ।
दीन-हीन-पतिताऽऽर्ति-हारिणीं
साम्य-सौख्य-मुदिता-प्रसारिणीम् ॥ वन्दे० ॥

रोग-शोक-भय-दुःख-प्रहर्त्री
क्षोभ-रोष-क्षय-क्षति-सहर्त्रीम् ।
जागृति-ममता-गुण-सधर्त्री
नव्य-चेतनोत्साह-प्रदात्रीम् ॥ वन्दे० ॥

शान्ति-सौख्यदा भुक्ति-मुक्ति-दा
जीवन-जागृति-स्फूर्ति-शक्ति-दाम् ।
विश्व-ज्ञानदा विश्व प्रेमदा
विश्व-शान्तिदा करुणा-पूर्णाम् ॥ वन्दे० ॥

क्रान्ति-शान्ति-कर युग्म-धारिणी
पाप-तापिनी स्वार्थ-नाशिनीम् ।
शक्ति-भक्ति बल-वीर्य-दायिनी
क्रान्ति-तोषिणी शत्रु-शोषिणीम् ॥ वन्दे० ॥

Proofread by Mandar Mali

*Vande Bharata Mataram 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*